Roll N0..................

Total No. of Pages: 10

Total No. of Questions: 28

वार्षिक परीक्षा 2025–26

पूर्वमध्यमा द्वितीय खण्ड

पौरोहित्यम् 1018

आदर्श उत्तर 1

समयः3घण्टे

पूर्णांकः100

---

निर्देशः–अधेलिखिताः सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः।

1. उचित विकल्पं चित्वा लिखत– 1x6=6
   - (क) –(द) आकाशम्
   - (ख) –(ब) वरूणः
   - (ग) –(स) श्वेतः
   - (घ) –(अ) चत्वारः
   - (ङ) –(अ) द्विविधम्
   - (च) –(अ) कृतिका

2. रिक्त स्थानानि पूरयत– 1x6=6
   - (क) अशौचम्
   - (ख) सद्गुणानां
   - (ग) अग्निः
   - (घ) विश्वकर्मा
   - (ङ) पाद्यदानम्
   - (च) धनम्

3.यथोचितं युग्मं मेलयत्– 1x6=6

| | | |
|---|---|---|
| (क) | क्व्याद्– | श्मशानाग्नेः |
| (ख) | अंगवृद्धिः– | हर्निया |
| (ग) | मखः– | यज्ञः |
| (घ) | तार्क्ष्यः– | गरूडः |
| (ङ) | भूतये– | कल्याणाय |
| (च) | जटायुक्त– | कपर्दी |

4. अधोलिखितेषु वाक्येषु सत्यं/असत्यं लिखत– 1x7=7

(क) असत्यं
(ख) असत्यं
(ग) सत्यं
(घ) असत्यं
(ङ) असत्यं
(च) सत्यं
(छ) सत्यं

5. एकपदीय प्रश्नाः– 1x7= 7

(क) पुत्रवतीभिर्वृद्धसुवासिनीभिः
(ख) गुप्तः
(ग) पोषकतत्त्वं
(घ) यज्ञे
(ङ) सूतिकान्ते
(च) यूयं पाणिप्रक्षालनेन
(छ) मनोवेगी सविता

प्रश्न 6 का उत्तर

**भूमिः, आपः अर्थात् जलम्, अनलः अर्थात् अग्निः, वायुः, खं अर्थात् आकाशः, मनः, बुद्धिः, अहङ्कार इति अष्टधा परमात्मनः प्रकृतिः वर्तते।**

प्रश्न 7 का उत्तर

**हे मित्र ! हे वरुण! उषसः गते काले सति युवां उभौ उदिथः एवं सूर्योपि उदेति । युवां हरिण्यरूपौ। युवां रथे आरोहणम् स्याताम् तदा अदितिं तया दितिं च पश्यतम्, एवं कथय हे दक्षिणबाहो ! त्वं मित्र असि। हे वामबाहो ! त्वं वरुण असि ॥**

प्रश्न 8 का उत्तर

**आयुष्यं, ब्रह्मवर्चसं, धन-समृद्धिः, शत्रुभेदनं, इदं स्वर्णरजतादिकं, तेजः च विजयाय मयि प्रविशन्तु ।**

प्रश्न 9 का उत्तर

**"श्राद्धं न कुरुते मोहात् तस्य रक्तं पिबन्ति ते ।" (ब्रह्मपुराणम्)**
**यः मोहात् श्राद्धं न करोति चेत् तस्य रक्तपानं पितरः कुर्वन्ति।**
**"पितरस्तस्य शापं दत्त्वा प्रयान्ति च।" (नागरखण्ड)**
**रक्तपानेन सह पितरः शापम् अपि ददति ।**

प्रश्न 10 का उत्तर

**पूर्वदिशायां सुन्दरकिरणयुक्तः, कमनीयः, महान् सूर्यः सर्वप्रथमः उदेति**

प्रश्न 11 का उत्तर

कर्णच्छेदेनने अंगवृद्धिः (हर्निया) नामकः रोगः न भवति।

प्रश्न 12 का उत्तर

**जन्मनः समये बालकस्य गृहाद् बहिर्गमनम् निषेधं कृतमस्ति कारणं यत् जन्मनः प्रारम्भिके काले सूर्यप्रकाशः दुष्प्रभावकारको भवति।**

प्रश्न 13 का उत्तर

**बाह्यमशौचं यैः कारणैर्भवति। तानि च जन्म, मरणम्, अनुलोमविवाहः, शिशुमृत्युः, गर्भस्त्रावः, गर्भपातनम्, ऋतुस्त्रावः इत्यादीनि ।**

प्रश्न 14 का उत्तर

**अस्य श्री प्राणप्रतिष्ठा मंत्रस्य ब्रह्मविष्णुरुद्राऋषयः ऋग्यजुः सामानि छंदासि परा प्राणशक्तिर्देवता आं बीजम् ह्रीं शक्तिः क्रों कीलकम् आसाम् मूर्तीनां प्राणप्रतिष्ठापने विनियोगः।**

प्रश्न 15 का उत्तर

**षट्-पिण्डीकरणम् अर्थात् षण्णां पिण्डानां करणीयाः मरणोत्तरविधयः क्रियाः वा। षट्-पिण्डीकरणं मनुष्यमृत्योः पश्चात् करणीया अन्त्येष्टिक्रियाया अङ्गभूता एका क्रिया अस्ति।**

प्रश्न 16 का उत्तर

**पवमानस्य विषये यथोक्तं मत्स्यपुराणे -**

**अथ यः पवमानस्तुनिर्मथ्योऽग्निः स उच्यते ।**
**स च वै गार्हपत्योऽग्निः प्रथमो ब्रह्मणः सुतः ॥**

प्रश्न 17 का उत्तर

लोपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥
स्वतः प्रारभ्य सप्तपुरुषपर्यन्तं सापिण्ड्यं भवति।
अविवाहितायाः नार्याः स्वतः पुरुषत्रयपर्यन्तं सापिण्ड्यं भवति ।

प्रश्न 18 का उत्तर

चरुहोमः—

चरुमध्ये घृतस्य मिश्रणं कृत्वा निम्नलिखितमन्त्रैः एकैका आहुतिः दीयते।

ॐ प्राणेनान्नमशीय स्वाहा। इदं प्राणाय न मम।
ॐ अपानेन गन्धानशीय स्वाहा। इदमपानाय न मम।
ॐ चक्षुषा रुपाण्यशीय स्वाहा। इदं चक्षुषे न मम।
ॐ श्रोत्रेण यशोऽयशीय स्वाहा। इदं श्रोत्राय न मम।

प्रश्न 19 का उत्तर

बालकस्य कर्णवेधस्य उद्देश्यो द्वौ विद्येते -
प्रथमोद्देश्यः - बालकस्य रक्षा इति।
द्वितीयोद्देश्यः बालकस्य कर्णे आभूषणं भूषयेत् तदर्थमिति।

प्रश्न 20 का उत्तर

समूहने कश्यपश्च लेपने त्वश्विनौ तथा।
मित्रावरुणावुल्लेखे युद्धुत्ये चाऽग्निदेवताः ।
अभ्युक्षणे च गन्धर्वाः वह्नि-स्थापन-देवताः ॥
समूहनसंस्कारे कश्यपः, लेपने अश्विनौ, उल्लेखे मित्रावरुणौ, उद्धुत्ये अग्निः,
अभ्युक्षणे गन्धर्वाः, इति देवाः निवसन्ति ।

प्रश्न 21 का उत्तर

**श्रद्धायाः आवाहनम्—**

**मन्त्रः -ॐ व्व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ॥**
**दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥**

प्रश्न 22 का उत्तर

पुण्य + अहः पुण्याहः तस्य वाचनम् पुण्याहवाचनम्। अस्य इदमेव तात्पर्यं यत् अस्मिन् विधौ ब्राह्मणाः यजमानस्य आत्यन्तिककल्याणाय विशेषविधिना पुण्याहवाचनं कुर्वन्ति आशीर्वादान् च यच्छन्ति । (वाचस्पत्यम् ग्रन्थे पुण्याहवाचनस्य विशेषः अर्थः विप्रद्वारा पुण्यदिनस्य वाचनम् इति प्रदत्तः । उक्तञ्च-

पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते ।

एतदेव निरोंकारं कुर्यात् क्षत्रियवैश्ययोः

---

तस्याः वरुणदेवतायाः पूजने अस्माकं शरीरे तथा च वातावरणे आवश्यकमात्रायां जलस्य आपूर्तिः स्यात् इति प्रार्थयामहे) तदनन्तरं च जलाभिषेचनपूर्वकं यजमानाय आशीर्वादान् यच्छामः । अत्र पुण्याहवाचनप्रयोगे ब्राह्मणाः यजमानकल्याणार्थं माङ्गलिकपूजादिभिः देवपितृकार्याणि च सम्पादयन्तः देवान् प्रार्थयन्ति यजमानेभ्यश्च आशीर्वादान् यच्छन्ति । पुनश्च यजमानोऽपि ब्राह्मणान् प्रार्थयति । तदनन्तरं ते विप्राः पुण्य-कल्याण-ऋद्धि-स्वस्ति-श्रीः इति पञ्चवाक्यैः आशीर्वादान् यच्छन्ति ।

*अथवा*

**सर्वोषधिप्रक्षेपः**

**मन्त्रः**

**ॐ याऽ ओषधीः पूर्वाजाता देवेभ्यस्त्रियुगं पुरा।**
**मनैनुबभ्रूणा महः शतन्धामानि सप्त च ॥**

**भावार्थः** - या ओषधयः सृष्ट्यादौ देवेभ्यः ऋतुभ्यः वसन्ते, प्रावृषि, शरदि च पूर्वं जाताः । अहं ताः पक्वाः पिङ्गलवर्णाः ओषधयः शतम् एवं सप्ततेजीयुक्ताः सन्ति इति जानामि ॥

प्रश्न 23 का उत्तर

**शौचाशौचस्य लक्षणम् -**

शुच्" धातोः कि-प्रत्यये कृते शुचिशब्दः निष्पद्यते । अत्र शुचिः अर्थात् विमलम् अमलं शुद्धं पवित्रं वा। शुचेः भावः शौचम्। इतिकृत्वा शौचं नाम शुद्धत्वं पवित्रत्वं वा। शौचस्य (शुद्धत्वस्य) अभाव एव अशौचम्।

अथवा

षट्-पिण्डी करणं न भवति तत्र मृतकः तिर्यक्योनिं प्राप्नोति ।
गरुडपुराणस्य दशमे अध्याये मृत्योः पश्चात् विधातव्यानि कर्माणि उल्लिखितानि सन्ति। तत्र षट्-पिण्डीसहितानि प्रदत्तानि सन्ति। तत्र षट्-पिण्डीकरणस्य बहुमहत्त्वं प्रतिपादितम् अस्ति ।

देहावसाने कर्तव्यं, तिर्यग्योनिनिवृत्तये ।

षट्-पिण्डानां प्रदानेन, स्वर्लोकत्वं च गच्छति ॥

प्रश्न 24 का उत्तर

योगस्तपो दमो दानं सत्यं शौचं दया श्रुतम्।

विद्या विज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम् ॥

योगः, तपः, दमः, दानं, सत्यंः शौचं, दया, यज्ञः, श्रुतं, विद्या, विनयं, आस्तिक्यं एते सर्वे गुणाः ब्राह्मणे स्युः। एतदेव ब्राह्मणलक्षणम् ।

अथवा

एकविंशत्यहर्यज्ञे विवाहे दश वासराः ।

त्रिषट् चौलोपनयने नान्दीश्राद्धं विधीयते ॥

यज्ञे एकविंशतिदिनात् पूर्वम्, विवाहसंस्कारे दशदिनात् पूर्वम्, चौलसंस्कारे त्रिदिनात् पूर्वम् एवम् उपनयनसं षट्दिनात् पूर्वं नान्दीश्राद्धं करणीयम् ।

प्रश्न 25 का उत्तर

ब्राह्मणजातकानां नाम मङ्गलसूचकं, क्षत्रियाणां शौर्यसूचकं, वैश्यानां ऐश्वर्यसूचकं तथा च शूद्राणाम् सेवाभक्तिसूचकं भवति। ब्राह्मणानां नामान्ते "शर्मा" क्षत्रियाणां नामान्ते "वर्मा" वैश्यानां नामान्ते "गुप्तः" तथा च शूद्राणां नामान्ते "दासः" इति योजितं भवति

अथवा

भद्रं कर्णेभिः शणुयाम देवा भद्रं पश्येमाक्षभिर्ययत्राः स्थिरैरङ्गैस्तुष्टुवाट सस्तनूभिर्व्यशेमहिदेवहितं यदायुः ॥ हे देवाः । वयं कर्णैः भद्रवचनानि शृणुयाम, हे जयजनीयदेवः । नयनैः वयं कल्याणयुक्तमेव पश्येम, स्थिरैः, अङ्गैः सर्वदेवान् स्तुवन्तः वयं स्वशरीरैः देवदत्तम् आयुः प्राप्नुयाम।

अनेन मन्त्रेण पिता बालकस्य दक्षिणं कर्णं जलेन आर्द्रं करोति।

अथवा

**परिसमूहनम् संस्कारः (पञ्चभूसंस्कारस्य सन्दर्भे)**

**पञ्चभूसंस्काराः यज्ञकर्मणि पूजाकर्मणि च भूमेः शुद्ध्यर्थं क्रियमाणाः पञ्च संस्काराः सन्ति। तेषु प्रथमः संस्कारः परिसमूहनम् इति कथ्यते।**

**परिसमूहनम् नाम कुशैः झाडूपत्रैः वा भूमेः सम्यक् मार्जनम्। अस्मिन् संस्कारे यज्ञस्थलं पूजास्थलं वा सर्वतः सम्यक् शुद्धीकृत्य धूलि-मलादीन् अपसार्यते।**

**परिभाषा :**

**कुशादिभिः भूमेः सम्यक् मार्जनं परिसमूहनम् इति उच्यते।**

**महत्त्वम् :**

1 **अनेन संस्कारेण भूमेः बाह्यशुद्धिः भवति।**

2 **धूलि-मलादयः अशुद्धयः अपसार्यन्ते।**

3 **देवपूजायै यज्ञकर्मणि च स्थानं पवित्रं भवति।**

**अतः यज्ञकर्मणः पूजाकर्मणः च आरम्भे परिसमूहनम् संस्कारः अत्यन्तं आवश्यकः मन्यते।**

प्रश्न 28 का उत्तर

**ॐ सविता त्वा सवानासुवतामग्निर्गुपतीनाथ सोमोवनस्पतीनाम् ।**
**बृहस्पतिर्वाचऽइन्द्रोज्येष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो व्वरुणो धर्मपतीनाम् ॥**

**भावार्थः - हे यजमान । सविता त्वां प्रेरयन्तु, अग्निः त्वां गृहस्थानाम् आधिपत्ये स्थापयतु, सोमः त्वां वृक्षाणाम् आधिपत्ये प्रेरयतु, बृहस्पतिः त्वां पाण्डित्ये प्रेरयतु, इन्द्रः ज्येष्ठभावाय त्वां प्रेरयतु रुद्रः पशूनाम् आधिपत्ये त्वां प्रेरयतु, मित्रः देवः सत्यं वक्तुं त्वां प्रेरयतु, वरुणः धर्मशीलानाम् आधिपत्ये त्वां प्रेरयतु ॥**

अथवा

**ॐ अश्वत्त्थोदुम्बरौ प्लक्षः चूतन्यग्रोधपल्लवाः ।**

**पञ्चैतान् पल्लवानस्मिन् कलशे प्रक्षिपाम्यहम् ॥**

**पुण्याहवाचने पञ्चपल्लवस्य महत्त्वम्**

**पुण्याहवाचने पञ्चपल्लवस्य विशेषं महत्त्वम् अस्ति।**

प्रश्न 26 का उत्तर

**कन्यादानसंकल्पः**

**विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णो... इत्यादि पठित्वा । एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ अस्याः कन्याया विषाख्ययोगजननवैधव्यदोषापनुत्तये श्रीविष्णुस्वरूपिणे अश्वत्थकुम्भाय श्रीरूपिणीमिमां कन्यां तुभ्यमहं सम्प्रददे। इति पठित्वा कन्याया दक्षिणहस्ते जलं दत्त्वा तद्धस्तं विष्णुस्वरूपायाश्वत्थकुम्भाय समर्प्य मन्त्रं पठेत् ॥**

**गौरी कन्यामिमां श्लक्ष्णां यथाशक्ति विभूषिताम् ।**

**ददामि विष्णवे तुभ्यं सौभाग्यं देहि सर्वदा ॥"**

**विष्णरूपिणे कुंभायेमां कन्यां संप्रददे ॥**

अथवा

**जन्मोत्थं च विलोक्य बालविधवायोगं विधाय व्रतं सावित्र्या उत पैप्पलं हि सुतया दद्यादिमां वा रहः । संल्लग्नेऽच्युतमूर्तिपिप्पलघटैः कृत्वा विवाहं स्फुटं दद्यातां चिरजीविनेऽत्र न भवेद्दोषः पुनर्भूभवः ॥- कन्यायाः जन्मकुंडल्यां बालवैधव्यकारकः योगः स्यात् चेत् कन्यायाः पितरौ एकान्ते कन्यां नीत्वा निश्चियपूर्वकं सावित्रीव्रतं कारयित्वा एवं पैपलव्रतं कारयिता एवं विष्णुप्रतिमा अश्वत्थः एवं कुम्भः एतैः सह विवाहं कृत्वा इयं कन्या चिरंजीववराय देया एनेनोयायेन वैधव्यदोषपरिहारः भवति एवं द्वाभ्यां वराभ्यां सह विवाहदोषोऽपि नश्यति।**

**कन्यापिता सपत्नीकः कुम्भविवाहोक्तान् सम्भारानादाय देवालयं गत्वा शुभासने प्राङ्मुख उपविश्य आचमनं प्राणायामञ्च कृत्वा स्वकन्याया विषकन्यात्वदोषपरिहारार्थं कुम्भविवाहं कुर्यात् ।**

प्रश्न 27 का उत्तर

**कलशस्य मुखे विष्णुःए कण्ठे रुद्रः समाश्रितः वर्तते । तत्र कलशस्य मूले ब्रह्मा स्थित वर्तते, मध्ये च मातृगणाः स्मृताः । कुक्षौ तु सर्वे सागराः सप्तद्वीपा वसुन्धरा च निवसन्ति । तत्र ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्वणः इति वेदाः अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः सन्तः निवसन्ति । अत्र गायत्री सावित्री शान्तिः पुष्टिकरी च निवसन्ति।**

पञ्चपल्लवः नाम पञ्चानां पवित्रवृक्षाणां पल्लवाः (पत्राणि) भवन्ति। एतेषां पल्लवानां प्रयोगः कलशे कृत्वा जलं पवित्रं क्रियते तथा च तेन जलेन अभ्युक्षणं (छिड़काव) कृत्वा स्थानस्य, वस्तूनां जनानां च शुद्धिः क्रियते।

पञ्चपल्लवाः

पञ्चपल्लवाः सामान्यतया एते भवन्ति

1 अश्वत्थः (पीपलः)

2 वटः (बरगदः)

3 आमः (आमवृक्षः)

4 प्लक्षः (पाकडवृक्षः)

5 उदुम्बरः (गूलरवृक्षः)

पञ्चपल्लवस्य महत्त्वम्

1 पवित्रतायाः प्रतीकः एते वृक्षाः शास्त्रेषु पवित्राः कथिताः सन्ति।

2 देवानां निवासः एतेषु वृक्षेषु देवतानां वासः इति विश्वासः अस्ति।

3 पञ्चमहाभूतानां प्रतीकः पञ्चपल्लवाः पृथिवी, आपः, तेजः, वायुः, आकाशः इत्येतानां प्रतीकाः मन्यन्ते।

4 मङ्गलप्रदाः एतेषां प्रयोगेण कार्ये मङ्गलं, शान्तिः, समृद्धिः च भवति।

5 शुद्धिकरणम् पञ्चपल्लवयुक्तेन जलेन अभ्युक्षणं कृत्वा वातावरणस्य शुद्धिः भवति।

******************000000******************